

# ॥ मोक्षविंशक स्तोत्रं – श्रीहरिवंश पुराणम् ॥

## Mokshavimshaka Stotram – Harivamsha Puranam

The following is a rare hymn on Lord Ananta (Vishnu) by King Bali as told by Sage Narada taken from Harivamsha Puranam, Bhavishya Parva and Chapter 72. This hymn was given by Sage Narada to King Bali when he was sent to nether-world by Lord Vamana to get emancipation from bondage. The brief Phalashruti by Sage Vaishampayana declares that one who recites this hymn gets absolved of all sins including the killing of cows and brahmins and begets all wishes fulfilled such as progeny, spouse, emancipation, relief from labor pain during child birth, etc.

श्रीनारद उवाच –

ॐ नमोऽस्त्वनन्तपतये अक्षयाय महात्मने ।
जलेशयाय देवाय पद्मनाभाय विष्णवे ॥ १ ॥

सप्त-सूर्य-वपुः कृत्वा त्रींल्लोकान् क्रान्तवानसि ।
भगवन् कालकालस् त्वं तेन सत्येन मोक्षय ॥ २ ॥

नष्ट-चन्द्रार्क गगने क्षीण यज्ञ तपः क्रिये ।
पुनश्चिन्तयसे लोकांस् तेन सत्येन मोक्षय ॥ ३ ॥

ब्रह्म-रुद्रेन्द्र वाय्वग्नि सरिद् भुजग पर्वताः ।
त्वत्स्था दृष्टा द्विजेन्द्रेण तेन सत्येन मोक्षय ॥ ४ ॥

मार्कण्डेन पुरा कल्पे प्रविश्य जठरं तव ।
चराचर-गतं दृष्टं तेन सत्येन मोक्षय ॥ ५ ॥

एको विद्या सहायस् त्वं योगी योगमुपागतः ।
पुनस्त्रैलोक्यं-उत्सृज्य तेन सत्येन मोक्षय ॥ ६ ॥

जलशय्यामुपासीनो योगनिद्रामुपागतः ।
लोकांश्चिन्तयसे भूयस् तेन सत्येन मोक्षय ॥ ७ ॥

वाराहं रूपमास्थाय वेद यज्ञ पुरस्कृतम् ।
धरा जलोद्धृता येन तेन सत्येन मोक्षय ॥ ८ ॥

उद्धृत्य दंष्ट्र्या यज्ञांस् त्रीन् पिण्डान् कृतवानसि ।
त्वं पितॄणामपि हरे तेन सत्येन मोक्षय ॥ ९ ॥

प्रदुद्रुवुः सुराः सर्वे हिरण्याक्ष भयार्दिताः ।
परित्रातास् त्वया देव तेन सत्येन मोक्षय ॥ १० ॥

दीर्घ-वक्त्रेण रूपेण हिरण्याक्षस्य संयुगे ।
शिरो जहार चक्रेण तेन सत्येन मोक्षय ॥ ११ ॥

भग्न मूर्धास्थि मस्तिष्को हिरण्यकशिपुः पुरा ।
हुंकारेण हतो दैत्यस् तेन सत्येन मोक्षय ॥ १२ ॥

दानवाभ्यां हृता वेदा ब्रह्मणः पश्यतः पुरा ।
परित्रातास् त्वया देव तेन सत्येन मोक्षय ॥ १३ ॥

कृत्वा हयशिरो रूपं हत्वा तु मधु-कैटभौ ।
ब्रह्मणे तेऽर्पिता वेदास् तेन सत्येन मोक्षय ॥ १४ ॥

देव दानव गन्धर्वा यक्ष सिद्ध महोरगाः ।
अन्तं तव न पश्यन्ति तेन सत्येन मोक्षय ॥ १५ ॥

अपान्तरतमा नाम जातो देवस्य वै सुतः ।
कृताश्च तेन वेदार्थास् तेन सत्येन मोक्षय ॥ १६ ॥

वेद यज्ञा ऽग्निहोत्राणि पितृ-यज्ञ हवींषि च ।
रहस्यं तव देवस्य तेन सत्येन मोक्षय ॥ १७ ॥

ऋषिर् दीर्घतमा नाम जात्यन्धो गुरु-शापतः ।
त्वत्-प्रसादाच्च चक्षुष्मांस् तेन सत्येन मोक्षय ॥ १८ ॥

ग्राहग्रस्तं गजेन्द्रं च दीनं मृत्यु-वशं गतम् ।
भक्तं मोक्षितवांस् त्वं हि तेन सत्येन मोक्षय ॥ १९ ॥

अक्षयस् चाऽव्ययश्च त्वं ब्रह्मण्यो भक्तवत्सलः ।
उच्छ्रितानां नियन्तासि तेन सत्येन मोक्षय ॥ २० ॥

शङ्खं चक्रं गदां पद्मं शाङ्र्गं गरुडं एव च ।
प्रसादयामि शिरसा ते बन्धान् मोक्षयन्तु माम् ॥ २१ ॥

शङ्खं चक्रं गदा पद्मं शाङ्र्गं च गरुडदयः ।
हरिं प्रसादयामासुर् बलिं मोक्षय बन्धनात् ॥ २२ ॥

## ॥ फलश्रुतिः ॥

श्रीवैशम्पायन उवाच –

इमं स्तवं अनन्तस्य सर्व-पाप-प्रमोचनम् ।
यः पठेत नरो भक्त्या तस्य नश्यति किल्बिषम् ॥ २३ ॥

गो-हत्यायाः-प्रमुच्येत ब्रह्मघ्नो-ब्रह्म-हत्यया ।
अपुत्रो-लभते-पुत्रं कन्या-चैवेप्सितं-पतिम् ॥ २४ ॥

सद्यो-गर्भात्-प्रमुच्येत गर्भिणी-जनयेत्-सुतम् ।
ये च मोक्षैषिणो लोके योगिनः साङ्ख्यकापिलाः ॥ २५ ॥

स्तवेनानेन गच्छन्ति श्वेतद्वीपं अकल्मषाः ।
सर्व-काम-प्रदो ह्येष स्तवो ऽनन्तस्य कीर्त्यते ॥ २६ ॥

यः-पठेत्-प्रातरुत्थाय शुचिः प्रयत-मानसः ।
सर्वान्-कामान्-अवप्नोति मानवो नात्र-संशयः ॥ २७ ॥

---

॥ इति श्रीमहाभारते-खिलभागे-हरिवंशे भविष्य-पर्वणि वामन-प्रादुर्भावे
श्रीनारद-प्रोक्तं मोक्षविंशक स्तोत्रं सम्पूर्णम् ॥